# Aitareyopanishad Sasvara

# ઐતરેયોપનિષદ્ સસ્વરા

## Document Information

Text title : aitareyopaniShat

File name : aitareya.itx

Category : upanishhat

Location : doc_upanishhat

Author : Vedic Rishis

Transliterated by : Premraj Ware

Proofread by : Premraj Ware, NA

Description-comments : 8/108; RigVeda, Mukhyopanishad

Latest update : December 28, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 28, 2022

*sanskritdocuments.org*

# ઐતરેયોપનિષદ્ સસ્વરા

॥ ૐ ॥

ૐ વાઙ્મે મનસિ પ્રતિષ્ઠિતા મનો મે વાચિ
પ્રતિષ્ઠિતમાવિરાવીર્મ એધિ વેદસ્ય મ આણીસ્થઃ શ્રુતં મે મા
પ્રહાસીરનેનાધીતેનાહોરાત્રાન્ સન્દધામ્યૃતં વદિષ્યામિ સત્યં વદિષ્યામિ
તન્મામવતુ તદ્વક્તારમવત્વવતુ મામવતુ વક્તારમવતુ વક્તારમ્ ॥
ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

અથ ઋગ્વેદીયૈતરેયોપનિષત્ ।

અથ પ્રથમોઽધ્યાયઃ ।

## અથ પ્રથમઃ ખણ્ડઃ

આત્મા વા ઇદમેક એવાગ્ર આસીન્નાન્યત્કિઞ્ચન મિષત્ ।
સ ઈક્ષત લોકાન્નુ સૃજા ઇતિ ॥ ૧॥

સ ઇમાંલ્લોકાનસૃજત । અમ્ભો મરીચીર્મરમાપોઽદોઽમ્ભઃ પરેણ
દિવં દ્યૌઃ પ્રતિષ્ઠાઽન્તરિક્ષં મરીચયઃ ।
પૃથિવી મરો યા અધસ્તાત્તા આપઃ ॥ ૨॥

સ ઈક્ષતેમે નુ લોકા લોકપાલાન્નુ સૃજા ઇતિ ।
સોઽદ્ભ્ય એવ પુરુષં સમુદ્ધૃત્યામૂર્ચ્છયત્ ॥ ૩॥

તમભ્યતપત્તસ્યાભિતપ્તસ્ય મુખં નિરભિદ્યત યથાઽણ્ડમ્ ।
મુખાદ્વાગ્વાચોઽગ્નિર્નાસિકે નિરભિદ્યેતાં નાસિકાભ્યાં પ્રાણઃ
પ્રાણાદ્વાયુરક્ષિણી નિરભિદ્યેતામક્ષીભ્યાં ચક્ષુશ્ચક્ષુષ
આદિત્યઃ કર્ણૌ નિરભિદ્યેતાં કર્ણાભ્યાં શ્રોત્રં શ્રોત્રાદ્દિશસ્ત્વઙ્

નિરભિદ્યત ત્વચો લોમાનિ લોમભ્ય ઓષધિવનસ્પતયો હૃદયં
નિરભિદ્યત હૃદયાન્મનો મનસશ્ચન્દ્રમા નાભિર્નિરભિદ્યત
નાભ્યા અપાનોઽપાનાન્મૃત્યુઃ શિશ્નં નિરભિદ્યત શિશ્નાદ્રેતો
રેતસ આપઃ ॥ ૪॥

॥ ઇતિ પ્રથમઃ ખણ્ડઃ ॥

## અથ દ્વિતીયઃ ખણ્ડઃ

તા એતા દેવતાઃ સૃષ્ટા અસ્મિન્મહત્યર્ણવે પ્રાપતંસ્તમશનાયાપિપાસાભ્યામન્વવાર્જત્ ।
તા એનમબ્રુવન્નાયતનં નઃ પ્રજાનીહિ યસ્મિન્પ્રતિષ્ઠિતા અન્નમદામેતિ ॥ ૧॥

તાભ્યો ગામાનયત્તા અબ્રુવન્ન વૈ નોઽયમલમિતિ ।
તાભ્યોઽશ્વમાનયત્તા અબ્રુવન્ન વૈ નોઽયમલમિતિ ॥ ૨॥

તાભ્યઃ પુરુષમાનયત્તા અબ્રુવન્ સુકૃતં બતેતિ પુરુષો વાવ સુકૃતમ્ ।
તા અબ્રવીદ્યથાઽઽયતનં પ્રવિશતેતિ ॥ ૩॥

અગ્નિર્વાગ્ભૂત્વા મુખં પ્રાવિશદ્વાયુઃ પ્રાણો ભૂત્વા નાસિકે
પ્રાવિશદાદિત્યશ્ચક્ષુર્ભૂત્વાઽક્ષિણી પ્રાવિશાદ્દિશઃ શ્રોત્રં ભૂત્વા કર્ણૌ
પ્રાવિશન્નોષધિવનસ્પતયો લોમાનિ ભૂત્વા ત્વચં પ્રાવિશંશ્ચન્દ્રમા
મનો ભૂત્વા હૃદયં પ્રાવિશન્મૃત્યુરપાનો ભૂત્વા નાભિં પ્રાવિશદાપો
રેતો ભૂત્વા શિશ્નં પ્રાવિશન્ ॥ ૪॥

તમશનાયાપિપાસે અબ્રૂતામાવાભ્યામભિપ્રજાનીહીતિ ।
સ તે અબ્રવીદેતાસ્વેવ વાં દેવતાસ્વાભજામ્યેતાસુ ભાગિન્યૌ કરોમીતિ ।
તસ્માદ્યસ્યૈ કસ્યૈ ચ દેવતાયૈ હવિર્ગૃહ્યતે ભાગિન્યાવેવાસ્યામશનાયાપિપાસે ભવતઃ ॥ ૫॥

॥ ઇતિ દ્વિતીય ખણ્ડ ॥

## અથ તૃતીયઃ ખણ્ડઃ

સ ઈક્ષતેમે નુ લોકાશ્ચ લોકપાલાશ્ચાન્નમેભ્યઃ સૃજા ઇતિ ॥ ૧॥

સોઽપોભ્યતપત્તાભ્યોઽભિતપ્તાભ્યો મૂર્તિરજાયત યો વૈ સા મૂર્તિરજાયતાઽન્નં વૈ તત્ ॥ ૨॥

તદેતદભિસૃષ્ટં પરાઽત્યજિઘાંસત્તદ્વાચા જિઘૃક્ષત્તન્ના શક્નોદ્વાચા ગ્રહીતુમ્ ।
સ યદ્ધૈનદ્વાચાઽગ્રહૈષ્યદભિવ્યાહૃત્ય હૈવાન્નમત્રપ્સ્યત્ ॥ ૩॥

તત્પ્રાણેનાજિઘૃક્ષત્તન્નાશક્નોત્ પ્રાણેન ગ્રહીતુમ્ ।
સ યદ્ધૈનત્પ્રાણેનાગ્રહૈષ્યદભિપ્રાણ્ય હૈવાન્નમત્રપ્સ્યત્ ॥ ૪॥

તચ્ચક્ષુષાઽજિઘૃક્ષત્તન્નાશક્નોચ્ચક્ષુષા ગ્રહીતુમ્ ।
સ યદ્ધૈનચ્ચક્ષુષાઽગ્રહૈષ્યદ્ દૃષ્ટ્વા હૈવાન્નમત્રપ્સ્યત્ ॥ ૫॥

તચ્છ્રોત્રેણાજિઘૃક્ષત્તન્નાશક્નોચ્છ્રોત્રેણ ગ્રહીતુમ્ ।
સ યદ્ધૈનચ્છ્રોત્રેણાગ્રહૈષ્યચ્છ્રુત્વા હૈવાન્નમત્રપ્સ્યત્ ॥ ૬॥

તત્ત્વચાઽજિઘૃક્ષત્તન્નાશક્નોત્ ત્વચા ગ્રહીતુમ્ ।
સ યદ્ધૈનત્વચાઽગ્રહૈષ્યત્સ્પૃષ્ટ્વા હૈવાન્નમત્રપ્સ્યત્ ॥ ૭॥

તન્મનસાઽજિઘૃક્ષત્તન્નાશક્નોન્મનસા ગ્રહીતુમ્ ।
સ યદ્ધૈનન્મનસાઽગ્રહૈષ્યદ્ધ્યાત્વા હૈવાન્નમત્રપ્સ્યત્ ॥ ૮॥

તચ્છિશ્નેનાજિઘૃક્ષત્તન્નાશક્નોચ્છિશ્નેન ગ્રહીતુમ્ ।
સ યદ્ધૈનચ્છિશ્નેનાગ્રહૈષ્યદ્વિસૃજ્ય હૈવાન્નમત્રપ્સ્યત્ ॥ ૯॥

તદપાનેનાજિઘૃક્ષત્તદાવયત્ ।
સ એષોઽન્નસ્ય ગ્રહો યદ્વાયુરન્નમાયુર્વા એષ યદ્વાયુઃ ॥ ૧૦॥

સ ઈક્ષત કથં ન્વિદં મદૃતે સ્યાદિતિ સ ઈક્ષત કતરેણ પ્રપદ્યા ઇતિ ।
સ ઈક્ષત યદિ વાચાઽભિવ્યાહૃતં યદિ પ્રાણેનાભિપ્રાણિતં યદિ ચક્ષુષા
દૃષ્ટં યદિ શ્રોત્રેણ શ્રુતં યદિ ત્વચા સ્પૃષ્ટં યદિ મનસા ધ્યાતં યદ્યપાનેનાભ્યપાનિતં
યદિ શિશ્નેન વિસૃષ્ટમથ કોઽહમિતિ ॥ ૧૧॥

સ એતમેવ સીમાનં વિદર્યૈતયા દ્વારાપ્રાપદ્યત । સૈષા વિદૃતિર્નામ દ્વાસ્તદેતન્નાન્દનં
તસ્ય ત્રય આવસથાસ્ત્રયઃ સ્વપ્ના અયમાવસથોઽયમાવસથોઽયમાવસથ ઇતિ ॥ ૧૨॥

સ જાતો ભૂતાન્યભિવ્યૈખ્યત્ કિમિહાન્યં વાવદિષદિતિ ।
સ એતમેવ પુરુષં બ્રહ્મ તતમમપશ્યદિદમદર્શમહો ॥ ૧૩॥

તસ્માદિદન્દ્રો નામેદન્દ્રો હ વૈ નામ । તમિદન્દ્રં સન્તમિન્દ્રમિત્યાચક્ષતે પરોક્ષેણ ।

પરોક્ષપ્રિયા ઇવ હિ દેવાઃ પરોક્ષપ્રિયા ઇવ હિ દેવાઃ ॥ ૧૪॥

॥ ઇતિ તૃતીયઃ ખણ્ડઃ ॥

ઇત્યૈતરેય-દ્વિતીયારણ્યકે ચતુર્થોઽધ્યાયઃ ।
ઇતિ ઉપનિષત્સુ ચ પ્રથમોઽધ્યાયઃ ।
અથ દ્વિતીયો અધ્યાયઃ ।

## અથ ચતુર્થઃ ખણ્ડઃ

પુરુષે હ વા અયમાદિતો ગર્ભો ભવતિ । યદેતદ્રેતસ્તદેતત્સર્વેભ્યોઽઙ્ગેભ્યસ્તેજઃ
સમ્ભૂતમાત્મન્યેવાત્માનં બિભર્તિ તદ્યદા સ્ત્રિયાં સિઞ્ચત્યથૈનજ્જનયતિ તદસ્ય પ્રથમં જન્મ ॥ ૧॥

તત્ સ્ત્રિયાં આત્મભૂયં ગચ્છતિ યથા સ્વમઙ્ગં તથા ।
તસ્માદેનાં ન હિનસ્તિ સાસ્યૈતમાત્માનમત્ર ગતં ભાવયતિ ॥ ૨॥

સા ભાવયિત્રી ભાવયિતવ્યા ભવતિ તં સ્ત્રી ગર્ભં બિભર્તિ સોઽગ્ર એવ કુમારં
જન્મનોઽગ્રેઽધિભાવયતિ સ યત્કુમારં જન્મનોઽગ્રેઽધિભાવયત્યાત્માનમેવ તદ્ભાવયત્યેષાં
લોકાનાં સન્તત્યા એવં સન્તતા હીમે લોકાસ્તદસ્ય દ્વિતીયં જન્મ ॥ ૩॥

સોઽસ્યાયમાત્મા પુણ્યેભ્યઃ કર્મભ્યઃ પ્રતિધીયતે । અથાસ્યાઽયામિતર આત્મા
કૃતકૃત્યો વયોગતઃ પ્રૈતિ સ ઇતઃ પ્રયન્નેવ પુનર્જાયતે તદસ્ય તૃતીયં જન્મ ॥ ૪॥

તદુક્તમૃષિણા- "ગર્ભે નુ સન્નન્વેષામવેદમહં દેવાનાં
જનિમાનિ વિશ્વા । શતં મા પુર આયસીરરક્ષન્નધ
શ્યેનો જવસા નિરદીયમિતિ । (ઋગ્વેદે મણ્ડલે ૪ સૂક્તં ૨૭। ૧)
ગર્ભ એવૈતચ્છયાનો વામદેવ એવમુવાચ ॥૫॥

સ એવં વિદ્વાનસ્માચ્છરીરભેદાદૂર્ધ્વસૂત્ક્રમ્યામુષ્મિન્ સ્વર્ગે લોકે
સર્વાન્કામાનાપ્ત્વાઽમૃતઃ સમભવત્સમભવત્ ॥ ૬॥

॥ ઇતિ ચતુર્થઃ ખણ્ડઃ ॥

ઇત્યૈતરેયારણ્યકે પઞ્ચમોઽધ્યાયઃ ।
ઇતિ ઉપનિષત્સુ દ્વિતીયોધ્યાયઃ સમાપ્તઃ ।
અથ તૃતીયો અધ્યાયઃ ।

## અથ પઞ્ચમઃ ખણ્ડઃ

કોઽયમાત્મેતિ વયમુપાસ્મહે । કતરઃ સ આત્મા । યેન વા રૂપં પશ્યતિ યેન
વા શબ્દં શ‍ૃણોતિ યેન વા ગન્ધાનાજિઘ્રતિ યેન વા વાચં વ્યાકરોતિ યેન
વા સ્વાદુ ચાસ્વાદુ ચ વિજાનાતિ ॥ ૧॥

યદેતદ્ હૃદયં મનશ્ચૈતત્સંજ્ઞાનમાજ્ઞાનં વિજ્ઞાનં પ્રજ્ઞાનં મેધા
દૃષ્ટિર્ધૃતિર્મતિર્મનીષા જૂતિઃ સ્મૃતિઃ સઙ્કલ્પઃ ક્રતુરસુઃ કામો વશ ઇતિ ।
સર્વાણ્યેવૈતાનિ પ્રજ્ઞાનસ્ય નામધેયાનિ ભવન્તિ ॥ ૨॥

એષ બ્રહ્મૈષ ઇન્દ્ર એષ પ્રજાપતિરેતે સર્વે દેવા ઇમાનિ ચ પઞ્ચ મહાભૂતાનિ પૃથિવી વાયુરાકાશ આપો જ્યોતીંષીત્યેતાનીમાનિ ચ ક્ષુદ્રમિશ્રાણીવ બીજાનીતરાણિ ચેતરાણિ ચાણ્ડજાનિ ચ જરાયુજાનિ ચ સ્વેદજાનિ ચોદ્ભિજ્જાનિ ચાશ્વા ગાવઃ પુરુષા હસ્તિનો યત્કિઞ્ચેદં પ્રાણિ જઙ્ગમં ચ પતત્રિ ચ યચ્ચ સ્થાવરં સર્વં તત્પ્રજ્ઞાનેત્રં
પ્રજ્ઞાને પ્રતિષ્ઠિતં પ્રજ્ઞાનેત્રો લોકઃ પ્રજ્ઞા પ્રતિષ્ઠા પ્રજ્ઞાનં બ્રહ્મ ॥ ૩॥

સ એતેન પ્રાજ્ઞેનાત્મનાઽસ્માલ્લોકાદુત્ક્રમ્યામુષ્મિન્સ્વર્ગે
લોકે સર્વાન્કામાનાપ્ત્વાઽમૃતઃ સમભવત્સમભવદિત્યોમ્ ॥ ૪॥

॥ ઇતિ પઞ્ચમઃ ખણ્ડઃ ॥

ઇત્યૈતરેયારણ્યકે ષષ્ઠોઽધ્યાયઃ ।
ઇતિ ઉપનિષત્સુ તૃતીયોઽધ્યાયઃ ।
ૐ વાઙ્મે મનસિ પ્રતિષ્ઠિતા મનો મે વાચિ
પ્રતિષ્ઠિતમાવિરાવીર્મ એધિ વેદસ્ય મ આણીસ્થઃ શ્રુતં મે મા
પ્રહાસીરનેનાધીતેનાહોરાત્રાન્ સન્દધામ્યૃતં વદિષ્યામિ સત્યં વદિષ્યામિ
તન્મામવતુ તદ્વક્તારમવત્વવતુ મામવતુ વક્તારમવતુ વક્તારમ્ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

ઇત્યૈતરેયોપનિષત્સમ્પૂર્ણા ।

Encoded and proofread by Premraj Ware

*Aitareyopanishad Sasvara*

pdf was typeset on December 28, 2022

Please send corrections to *sanskrit@cheerful.com*